শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# ৱিল্লূর্ নডাদূর্ শ্রী শ্রীনিধিস্বামি কৃতিষু
# ॥শ্রীস্তোত্রম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ

# ॥ শ্রীস্তোত্রম্ ॥

করিতাজিতকল্লোলিকন্যকাকান্তৰক্ষসে।
করুণাদিগুণাঢ্যায কমলানিধযে নমঃ॥

মাতঃ! কোমলৱল্লি! মন্মন ইদং যুষ্মতকটাক্ষাভিধং
ভৃঙ্গং ৱাঞ্ছতি ঝঙ্কৃতিঃ পরতরা যস্যেদৃশী রাজতে।
অন্যোন্যং ধনহেমসঙ্গতিৱশাদস্মন্মনঃকর্ণযো-
রানন্দং দদতী ঋণজ্ঝণদিতি প্রক্রান্তলীলারসা॥ ১ ॥

জননি! কোমলৱল্লি! কৃপানিধে!
জনমিমং কৃপণং শরণাগতম্।
সকলতাপনিৱারণলম্পটৈ-
সসকৃদিৱ স্নপযস্ব ৱিলোকনৈঃ॥ ২ ॥

ক্ষীরাম্ভোধৌ জনকসদনে ভাসি কান্তেন মাতঃ!
কামং চাস্মিন্ কনকতটিনীসৈকতে মাতৃগেহে।
দৃশ্যসসোযং ন খলু ৱিবুধৈরপ্যহো তত্র নাথঃ
মন্দানাং নঃ পথি নযনযোরত্র ক্লৃপ্তো ভৱত্যা॥ ৩ ॥

শৈলে কাননদুর্গমে কথমমী গন্তুং ক্ষমা বালকাঃ
ইত্যেৱং করুণারসার্দ্রহৃদযা কান্তস্য কান্তং পরম্।
ৱক্ষস্তচ্চ ৱিহায পদ্মসদনে! জাযে! ৱৃষাদ্রীশিতুঃ
তস্যাদ্রেঃ কিমুপত্যকাপরিসরে ৱাসং ৱ্যধা নঃ কৃতে॥ ৪ ॥

পরাঙ্মুখং নাম ৱিধের্ৱিলাসা-
ন্নতেষৱমুং সম্মুখমাদধানা।
নাথং রমে! ততপুরতো নিৱিষ্টা
তমীক্ষসে কিং করিশৈলমূর্ধ্নি॥ ৫ ॥

সুন্দরৱল্লি! ত্বামালিঙ্গন
সুন্দরবাহুর্ৱনশৈলেন্দ্রঃ।

www.prapatti.com

সুন্দৰৱদনসসুন্দৰৱৰ্ণ্মা
সুন্দৰনামা জযতি পতিস্তে॥ ৬ ॥

সীতে! মাতৰ্ৱডুৱ্ৰূৰ্নিলযে!
ত্বত্তো নান্যা মম গতিৰস্তি।
ত্বযি কৃতমাগশ্শতমপি ৱিদতঃ
ত্বতকৃতৰাক্ষসৱনিতাৰক্ষাম্॥ ৭ ॥

যদুকুলপালকগোকুলবালক-
কৌতুকদাযিনি! ৰুক্মিণি! মাম্।
বালকপালককৌতুকদাৰিণি!
পালয পালয ৰুক্মিণি! মাম্॥ ৮ ॥

হৈযঙ্গৱীননটৱক্ষসি ভাসমানে!
সৌহিত্যদূৰললিতামৃতপাৰ্শ্বজাতে!।
মাতসসুৱৰ্ণমযি! মাং মধুৰৈঃ কটাক্ষৈঃ
হে লক্ষ্মি! শীতলতমৈশ্শিশিৰীকুৰুষ্ৱ॥ ৯ ॥

শ্ৰিযসস্তোত্ৰমিদং ভৱ্যং শ্ৰীমচ্ছ্ৰীনিধিনা কৃতম্।
শ্ৰদ্ধযা পঠতাং নিত্যং শ্ৰীৰাগচ্ছতি মন্দিৰম্॥ ১০ ॥

॥ ইতি শ্ৰীস্তোত্ৰং সম্পূৰ্ণম ॥

www.prapatti.com